# Ganga Stotram

# गङ्गास्तोत्रम्

## Document Information

Text title : Ganga Stotram 7

File name : gangAstotram7.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# गङ्गास्तोत्रम्

गङ्गे दर्शय ते रूपं मुक्तिदं मुनिचिन्तितम् ।
गायत्तारिणि ते दृष्ट्वा च्यवेत्को निजरूपतः ॥ १॥

गङ्गे त्रेधाऽघहन्त्रीति ते कीर्तिं दिक्षु विस्तृता ।
गेया योगिमुनिध्येया सदा त्वं गङ्ग आधिहे ॥ २॥

तिष्येंऽहस्तरणं मातर्वरिष्ठे बत नान्यतः ।
यो वैरिः कामसंज्ञो मे पाह्यतो रोषहेतुतः ॥ ३॥

ब्रूते कृत्स्नं श्रुतं त्रात्री पेयोदाबात्मिकेति यत् ।
या तृष्णया मतिर्भ्रष्टाऽऽ भ्योऽब्धो बालः पुनातु ताम् ॥ ४॥

द्योत उत्कृष्ट एवास्तु विष्णुजेऽपिहितान्तरे ।
जगन्मतिक्षालके भूष्णुस्सन्स्त्वां शान्तिदेर्थये ॥ ५॥

नास्मत्तारक एवान्यो लोके वाचो मृषा न मे ।
नान्तोऽनन्तेऽत्र मेऽघस्य कं ब्रूयां ज्ञानदेऽत्र तु ॥ ६॥

शत्रून्दमय मे देवि सकलानमृतप्रदे ।
तैर्हि दान्तो विमुक्तः स्यां गतैनाः साध्व्यसंशयः ॥ ७॥

रक्ष यद्यपि पापोऽहं च्छन्दोऽर्च्ये गवि जाह्नवि ।
पिता कः काऽपराम्बा मे तिष्ये तारः परश्च कः ॥ ८॥

मन्त्राद्याक्षरसहित
दत्तात्रेयो हरिः कृष्ण उन्मत्तानन्ददायकः ।
मुनिर्दिगम्बरो बालःपिशाचो ज्ञानसागरः ॥

गं गे द र्शय ते रूपं मु क्तिदं मु निचिन्तितम् ।
गा य त्ता रिणि ते दृष्ट्वा च्य वेत्को नि जरूपतः ॥ १॥

गं गे त्रे धाऽघहन्त्रीति ते कीर्तिं दिं क्षु विस्तृता ।

गे या यो गिमुनिध्येया स दा त्वं गं ग आधिहे ॥ २॥

ति ष्यें ह स्तरणं मात र्वे रिष्ठे ब त नान्यतः ।
यो वै रिः कामसंज्ञो मे पा ह्यतो रो ष हेतुतः ॥ ३॥

ब्रू ते कृ त्स्नश्रुतं त्रात्री पे योदा बा त्मिकेति यत् ।
या तृ ष्ण या मतिर्भ्रष्टाऽऽ भ्यो ऱ्यो बा लः पुनातु ताम् ॥ ४॥

द्यो त उ त्कृष्ट एवास्तु वि ष्णुजेऽ पि हितान्तरे ।
ज ग न्म ति क्षालके भू ष्णु स्सन्स्त्वां शा न्तिदेर्थये ॥ ५॥

ना स्म त्ता रक एवान्यो लो के वा चो मृषा न मे ।
नां तोऽ न न्तेऽत्र मेऽघस्य कं ब्रूयां ज्ञा नदेऽत्र तु ॥ ६॥

श त्रू न्द मय मे देवि स कला- न मृतप्रदे ।
तै र्हि दा न्तो विमुक्तः स्यां ग तैनाः सा ध्व्यसंशयः ॥ ७॥

र क्ष य द्यपि पापोऽहं च्छ न्दोऽर्च्यै ग वि जाह्नवि ।
पि क्षा कः काऽपराम्बा मे ति ष्ये ता रः परश्च कः ॥ ८॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं गङ्गास्तोत्रं सम्पूर्णम् ।

---

*Ganga Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*